लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2024-25

DINABANDHU MAHAVIDYALAYA
Estd.-1947
CENTRAL LIBRARY

## SANADSE01T-SANSKRIT (DSE1/2)

## VEDA & VYAKARANA

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

**सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्**

**क-विभागः**

1. अधो लिखितेषु प्रश्नेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः — $2\times5 = 10$

(क) यजुर्वेदस्य कति विभागाः सन्ति ? के च ते ?

(ख) रुद्रशब्दस्य किं निर्वचनम् ? कश्च रुद्रशब्दस्य अर्थः ?

(ग) 'अपापकाशिनी' इति पदस्य कोऽर्थः ? पदमिदं कमुद्दिश्य प्रयुक्तम् ?

(घ) 'प्रथमो दैव्यो भिषक्' – इत्यस्य वाक्यस्य कोऽर्थः ? अत्र कस्य उल्लेखः क्रियते ?

(ङ) 'गिरिशन्त' इति पदस्य कोऽर्थः ?

(च) 'यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्' — इत्यत्र किमर्थं कस्य स्तुतिः क्रियते ?

(छ) रुद्रः कथं 'कपर्दी' इत्युच्यते ? तस्य आयुधद्वयं किम् ?

**ख-विभागः**

2. अधो लिखितेषु प्रश्नेषु ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं देयम् — $10\times1 = 10$

(क) मनुमत्स्यकथा कुत्र समुपलभ्यते ? कथायाम् अस्यां प्रलयस्य प्रतिसर्गस्य च वर्णनं यथा प्राप्यते तथा वैशद्येन विवृणुत। 2+8

(ख) 'मत्स्य एव मत्स्यं गिलति' — केन कमुद्दिश्य किमर्थं च उक्तम् ? प्लावनकथामाधारीकृत्य वाक्यस्यास्य तात्पर्यं विवृणुत। 1+1+2+6

**ग-विभागः**

3. अधः प्रदत्तेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** टीकां लिखत। $5\times1 = 5$

(क) मुरजित्पादनखदीधितिदीपिकाः।

(ख) कविसूक्तिरसायनानि।

(ग) प्रसन्नललितां गाथाम्।

**अथवा**

अधःप्रदत्तेषु श्लोकेषु ***यथेच्छमेकः*** श्लोको व्याख्येयः। 5×1 = 5

(क) अग्निं पृणाति पृणति द्विजदेवताश्च
प्रीणाति बान्धवजनानतिथीन् पृणोति।
यः प्रीयते प्रणयिषु प्रयते च भृत्यान्
यं प्राययन्ति कविसूक्तिरसायनानि॥

(ख) गोपायति क्षितिमिमां चतुरब्धिसीमां
पापाज्जुगुप्सत उदारमतिः सदैव।
वित्तं न गोपयति यस्तु वलीयकेभ्यो-
धीरो न गुप्यति महत्यपि कार्यजाते॥

(ग) वाणावलिं किरत्याजौ करोति शरमण्डलम्।
कृणोति किरणं शत्रोः कृणाति तुरगान् रणे॥

**घ-विभागः**

4. अधो दत्तेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** टिप्पणीं लिखत। 5×1 = 5

(क) पितृदेवो भव।

(ख) शिक्षा।

(ग) ओमिति ब्रह्म।

**अथवा**

अधोलिखितेषु उपनिषद्वाक्येषु ***यथेच्छमेकं*** व्याख्येयम्। 5×1 = 5

(क) शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा वलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः।

(ख) अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्।

(ग) सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।

**ङ-विभागः**

5. ***यथेच्छमेकस्य*** प्रश्नस्योत्तरं विधेयम्— 10×1 = 10

(क) कः आसीत् नाभानेदिष्ठः ? तत्सम्बन्धिनीम् आख्यायिकां समासेन वर्णयित्वा तत्कालीनसमाजचित्रम् उपस्थाप्यताम्। 1+9

(ख) "यद्व एतत्सहस्रं सत्रपरिवेषणं तन्मे स्वर्यन्तो दत्तेति" — अत्र वक्ता कः ? कमुद्दिश्य वक्ता एवमुक्तवान् ? उपाख्यानस्य प्रतिपाद्यं तात्पर्यं च समुल्लिख्य समासेन एकः प्रबन्धो विरच्यताम्। 1+1+8

**च-विभागः**

6. अधःप्रदत्तेषु पदेषु यथेच्छं ***द्वयोः पदयोः*** रूपसाधनं कुरुत। 5×2 = 10
कोकिला, एड़का, विदुषी, इन्द्राणी, बह्वी।

**अथवा**

यथेच्छं ***सूत्रद्वयं*** व्याख्येयम्। 5×2 = 10

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

(क) अजाद्यतष्टाप्।

(ख) उगितश्च।

(ग) टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः।

(घ) पादोऽन्यतरस्याम्।

——×——